नुमतम्। यत् पुनरेकीयं मतमाचार्य्यः केवलमुपन्यस्तवान्, न तु तदुचितकर्त्तव्योपदेशादिना तत् प्रशंसितवान्, तदेकीयं मतं नाचार्य्यस्यानुमतमित्यर्थः। तत्रोदाहरणम्। "द्वादश महानाम्निकाः संवत्सरा नव षट् त्रय इति विकल्पः"—इति सूत्रेण स्वमतेन महानाम्निकव्रतकालमुपदिश्य "संवत्सरमप्येके" इति सूत्रेण एकीयं मतमुपन्यस्य "व्रतन्तु भूयः" इत्यादिभिः सूत्रैः तदेव एकीयं मतं तदुचितकर्त्तव्योपदेशादिना आचार्य्यः प्रशंसितवान्। तस्मात् तदेकीयं मतमाचार्य्यस्यानुमतमिति ज्ञायते। अपर आह। यानि एकीयमतानि आचार्य्येणोक्तानि तानि सर्व्वाण्येव कस्याञ्चिदवस्थायामाचार्य्यस्यानुमतानि। यानि पुनरेकीयमतान्याचार्य्यः प्रकर्षेण न कथितवान्—नैवोक्तवानित्यर्थः। तान्येकीयमतानि नाचार्य्यस्यानुमतानि,—इति ॥ १०२ ॥

द्रव्याणामुपक्लृप्तानां होमीयानां यथाविधि ॥ १०३ ॥
प्रसिञ्चन् * वीक्षणं कुर्य्यादद्भिरभ्युक्षणमेव च † ।

यथाविधि,—

"प्राञ्चं प्राञ्चमुदगग्नेरुदगग्रं समीपतः।
तत्तथाऽऽसादयेद्द्रव्यं यद्यथा विनियुज्यते" ॥

इति कर्म्मप्रदीपोक्तविध्यनुसारेण, उपक्लृप्तानाम्, समासादितानामित्यर्थः। होमीयानां होमसम्बन्धिनां द्रव्याणाम्। षष्ठी चेयं वीक्षणाभ्युक्षणसंबन्धापेक्षया द्रष्टव्या। तथा चोक्तम्।

---

* सादयन्,—इति तत्त्वकारधृतपाठः। † तथा,—इति पाठान्तरम्।

अत्रैव शिवम् ॥

श्लोकाः—९५

आदितः श्लोकाः—२०८ ॥

कैकयेषु वसता द्विजन्मना
तन्त्रजालमवलोक्य निर्म्मितम् ।
जीवरन्ध्रमुनिचन्द्रसम्मिते
वत्सरे वृषगते रवाविदम् ॥ १ ॥

सर्गस्थितिप्रत्यवहारहेतौ
अलोकसामान्यनयप्रवृत्तौ ।
दोषाकरेऽप्यादरमादधाने
समर्पितं भाष्यमिदं स्मरारौ ॥ २ ॥

सत्यपि दोषकलापे गुणलेशनिबद्धपक्षपातानाम् ।
जनयतु विदुषां तोषं कृतिरेषा चन्द्रकान्तस्य ॥ ३ ॥

अन्ध इव स्फुटदोषे गुणेषु विरलेषु वैनतेयइव ।
जयति जगत्यां लोकः कतिपयइह नौमि तं भक्त्या ॥ ४ ॥

इति सेरपुरनगरवास्तव्यस्य राधाकान्तसिद्धान्तवागीशभट्टाचार्य्यात्मजस्य ब्रह्ममयीसूनोः महामहोपाध्यायश्रीचन्द्रकान्ततर्कालङ्कारभट्टाचार्य्यस्य कृतौ गृह्यासंग्रहभाष्ये द्वितीयः प्रपाठकः समाप्तः॥ समाप्तञ्चेदं गृह्यासंग्रहभाष्यम् ॥

शुभमस्तु ॥ श्रीरस्तु ॥

